# Ganapati sUkta from Rigveda

# ऋग्वेदीय गणपतिसूक्त

## Document Information

Text title : RigvedIya gaNapatisUkta

File name : gaNapatisUkta.itx

Category : sUkta, veda, svara, rigveda, ganesha

Location : doc_veda

Author : Vedic Tradition

Proofread by : Mandar Kulkarni

Latest update : September 27, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 27, 2024

*sanskritdocuments.org*

Ganapati sUkta from Rigveda

# ऋग्वेदीय गणपतिसूक्त

श्रीगुरुभ्यो नमः हरिः ॐ ।

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

एकाशीतितमं सूक्तम् ।
(ऋषिः - कुसीदी काण्वः॥ देवता - इन्द्रः॥ छन्दः - १, ५, ८ गायत्री;
२, ३, ६, ७ निचृद्गायत्री; ४, ९ विराड्गायत्री ॥ स्वरः - षड्जः॥)

आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय ।
महाहस्ती दक्षिणेन ॥ ८.०८१.०१
विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम् ।
तुविमात्रमवोभिः ॥ ८.०८१.०२
नहि त्वा शूर देवा न मर्तासो दित्सन्तम् ।
भीमं न गां वारयन्ते ॥ ८.०८१.०३
एतो न्विन्द्रं स्तवामेशानं वस्वः स्वराजम् ।
न राधसा मर्धिषन्नः ॥ ८.०८१.०४
प्रस्तोषदुप गासिषच्छ्रवत्साम गीयमानम् ।
अभि राधसा जुगुरत् ॥ ८.०८१.०५
आ नो भर दक्षिणेनाभि सव्येन प्र मृश ।
इन्द्र मा नो वसोर्निर्भाक् ॥ ८.०८१.०६
उप क्रमस्वा भर धृषता धृष्णो जनानाम् ।
अदाशूष्टरस्य वेदः ॥ ८.०८१.०७
इन्द्र य उ नु ते अस्ति वाजो विप्रेभिः सनित्वः ।

अस्माभिः सु तं संनुहि ॥ ८.०८१.०८
सद्योजुवस्ते वाजा अस्मभ्यं विश्वश्चन्द्राः ।
वशैश्च मक्षू जरन्ते ॥ ८.०८१.०९

(ऋषिः - गृत्समदः॥ देवता - ब्रह्मणस्पतिः ॥ छन्दः - जगती ॥

स्वरः - निषादः ॥)

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥ २.०२३.०१

(ऋषिः - नभः प्रभेदनो वैरूपः ॥ देवता - इन्द्रः ॥ छन्दः - निचृत्त्रिष्टुप्॥

स्वरः - धैवतः॥)

निषुसीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् ।
न ऋते त्वत्क्रियते किं चनारे महामर्कं मघवञ्चित्रमर्च ॥ १०.११२.०९
अभिख्या नो मघवन्नाधमानान्सखे बोधि वसुपते सखीनाम् ।
रणं कृधि रणकृत्सत्यशुष्माभक्ते चिदा भजा राये अस्मान् ॥ १०.११२.१०

ॐ शान्तिः शान्तिः शान्तिः ॥

चप्तेर्॥ निःस्वरः ॥
ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

एकाशीतितमं सूक्तम् ।
(ऋषिः - कुसीदी काण्वः॥ देवता - इन्द्रः॥ छन्दः - १, ५, ८ गायत्री;
२, ३, ६, ७ निचृद्गायत्री; ४, ९ विराड्गायत्री ॥ स्वरः - षड्जः॥)

आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय ।
महाहस्ती दक्षिणेन ॥ ८.०८१.०१
विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम् ।
तुविमात्रमवोभिः ॥ ८.०८१.०२
नहि त्वा शूर देवा न मर्तासो दित्सन्तम् ।
भीमं न गां वारयन्ते ॥ ८.०८१.०३

एतो न्विन्द्रं स्तवामेशानं वस्वः स्वराजम् ।
न राधसा मर्धिषन्नः ॥ ८.०८१.०४
प्रस्तोषदुप गासिषच्छ्रवत्साम गीयमानम् ।
अभि राधसा जुगुरत् ॥ ८.०८१.०५
आ नो भर दक्षिणेनाभि सव्येन प्र मृश ।
इन्द्र मा नो वसोर्निर्भाक् ॥ ८.०८१.०६
उप क्रमस्वा भर धृषता धृष्णो जनानाम् ।
अदाशूष्टरस्य वेदः ॥ ८.०८१.०७
इन्द्र य उ नु ते अस्ति वाजो विप्रेभिः सनित्वः ।
अस्माभिः सु तं सनुहि ॥ ८.०८१.०८
सद्योजुवस्ते वाजा अस्मभ्यं विश्वश्चन्द्राः ।
वशैश्च मक्षू जरन्ते ॥ ८.०८१.०९

(ऋषिः - गृत्समदः॥ देवता - ब्रह्मणस्पतिः ॥ छन्दः - जगती ॥

स्वरः - निषादः ॥)

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनम् ॥ २.०२३.०१

(ऋषिः - नभः प्रभेदनो वैरूपः ॥ देवता - इन्द्रः ॥ छन्दः - निचृत्त्रिष्टुप्॥

स्वरः - धैवतः॥)

निषुसीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् ।
न ऋते त्वत्क्रियते किं चनारे महामर्कं मघवञ्चित्रमर्च ॥ १०.११२.०९
अभिख्या नो मघवन्नाधमानान्सखे बोधि वसुपते सखीनाम् ।
रणं कृधि रणकृत्सत्यशुष्माभक्ते चिदा भजा राये अस्मान् ॥ १०.११२.१०

ॐ शान्तिः शान्तिः शान्तिः ॥

*Ganapati sUkta from Rigveda*

pdf was typeset on September 27, 2024

Please send corrections to *sanskrit@cheerful.com*